सुस्निग्धा शुक्रला केश्या स्वर्य्या पित्तानिलास्रजित्।
व्रणशोथविषच्छर्द्दितृष्णाग्लानिक्षयापहा॥"
(हारभेदः। तल्लक्षणं यथा, वृहत्संहितायाम्। ८१। ३६।
"संयोजिता या मणिना तु मध्ये
यष्टीति सा भूषणविद्भिरुक्ता॥")

यष्टीकं, क्ली, (यष्टी+कन्।) यष्टिमधु। इति राजनिर्घण्टः॥

यष्टीपुष्पः, पुं, (यष्टीपुष्पमिव पुष्पं यस्य।) पुत्त्रजीववृक्षः। इति भावप्रकाशः॥

यष्टीमधु, क्ली, (यष्ट्यां मधु माधुर्य्यमस्य।) मिष्टमूलविशेषः। जेठीमधु इति मूलहटी इति च हिन्दी भाषा। तत्पर्य्यायः। मधुयष्टी २ मधुवल्ली ३ मधुस्रवा ४ मधूकम् ५ मधु ६ यष्टीकम् ७ यष्ट्याह्वम् ८। (तथा च।
"यष्टीमधु तथा यष्टी मधुकं क्लीतकन्तथा।
अन्यत् क्लीतनकन्तत्तु भवेत्तोये मधूलिका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)
अस्य गुणाः। मधुरत्वम्। किञ्चित्तिक्तत्वम्। शीतलत्वम्। चक्षुष्यत्वम्। पित्तहरत्वम्। रुच्यत्वम्। शोषतृष्णाव्रणापहत्वञ्च। इति राजनिर्घण्टः॥ (यथा, सुश्रुते चिकित्सितस्थाने २७ अध्याये। "तत्र विडङ्गतण्डुलचूर्णमाहृत्य यष्टीमधुयुक्तं यथाबलं शीततोयेनोपयुञ्जीत॥")

यष्ट्याह्वं, क्ली, (यष्ट्याह्वा यस्य।) यष्टिमधु। इति राजनिर्घण्टः॥ (यथा, सुश्रुते सूत्रस्थाने १६ अध्याये।
"यवाश्वगन्धा यष्ट्याह्वैस्तिलैश्चोद्वर्त्तनं
हितम्॥")

यस, इर् य उ यतने। इति कविकल्पद्रुमः॥ (दिवा०-पर०-अक०-सेट्। क्वावेट्।) इर्, अयसत् अयासीत् अयसीत्। असात् पुषादित्वान्नित्यं ङ इत्यन्ये। य, प्रयस्यति। क्रम क्लम इत्यादिना केवलात् संपूर्व्वाच्च अस्मात् श्यन् विकल्पात् यसति यस्यति संयस्यति संयसति। उ, यसित्वा यस्त्वा। यतनं यत्नः। इति दुर्गादासः॥

यस्कः, पुं, (यसति मोक्षायेति। यस्+क्विप्। संज्ञायां कन्।) मुनिविशेषः। इति मुग्धबोधव्याकरणम्॥ (यथा, आश्वलायनश्रौतसूत्रे उत्तरार्द्धे। ६।१०।१०। "यस्कवाधौलमौनमौकशार्कराक्षिसार्ष्टिसावर्णिशालङ्कायनजैमिनिदेवन्त्यायनानां भार्गववैतहव्यसावेतसेति॥")

यह्वः, पुं, (यजतीति। यज+"श्वेवायज्जिह्वाग्रीवापामीवाः।" उणा० १। १५४। इति वन्प्रत्ययेन निपातितः।) यजमानः। इत्युणादिकोषः॥ (त्रि, महान्। यथा, ऋग्वेदे। ३। १। १२।
"उद्रुस्रिया जनिता यो जजानापां गर्भो नृतमो
यह्वो अग्निः।"
"यह्वो महान्।" इति तद्भाष्ये सायणः॥)

या, ल गतौ। इति कविकल्पद्रुमः॥ (अदा०-पर०-सक०-अनिट्।) ल, याति। इति दुर्गादासः॥

यागः, पुं, (इज्यते इति। यज्+घञ्।) यज्ञः। इत्यमरः। २। ७। १३॥ तत्र श्रौताग्निसाध्यहविर्यज्ञाः सप्त। यथा। आग्न्याधानं तद्देवाग्निहोत्रम् १ दर्शपौर्णमासौ २ पिण्डपितृयज्ञः ३ आग्रयणम् ४ चातुर्म्मास्यः ५ निरूढपशुबन्धः ६ सौत्रामणिः ७। स्मार्त्ताग्निकृत्यपाकयज्ञाः सप्त। यथा। औपासनम् १ वैश्वदेवः २ स्थालीपाकः ३ आग्रयणम् ४ सर्पबलिः ५ ईशानबलिः ६ अष्टकान्वष्टका ७। श्रौताग्निसप्तसंस्थाः। यथा। सोमयागः स एवाग्निष्टोमः १ अत्यग्निष्टोमः २ उक्थ्यः ३ षोड़शी ४ वाजपेयः ५ स द्विविधः संस्था क्रतुश्च। अतिरात्रः ६ अप्तूर्य्यामः ७। उत्तरक्रतवो बहवः। यथा। महाव्रतम् १ सर्व्वतोमुखम् २ राजसूयः ३ पौण्डरीकम् ४ अभिजित् ५ विश्वजित् ६ अश्वमेधः ७ बृहस्पतिसवः ८ आङ्गिरसः ९ चयनान्यष्टादश २७। इत्यादि श्रौतसूत्रम्॥*॥ सर्व्वदेवानां यागकालो यथा,

शुक्र उवाच।
"स्वल्पेनैव तु द्रव्येण महापुण्यं यथा भवेत्।
तदहं श्रोतुमिच्छामि ग्रहयागं सुरेश्वर!॥

ब्रह्मोवाच।
शृणु वत्स प्रवक्ष्यामि यथा त्वं परिपृच्छसि।
अल्पकेन महापुण्यं ग्रहर्क्षतिथियौगिकम्॥
भृगुपूर्व्वाष्टमीयोगं शिवयागेषु चोत्तमम्।
मृदुवर्गश्च भाग्यञ्च उमाया भृगुवासरे॥
दैवयोगात् यदा षष्ठी पुष्यर्क्षं रविवासरम्।
स्कन्दयागस्तदा कार्य्यः सर्व्वकामप्रसाधकः॥
वारेण वा यदा सूर्य्यः सप्तमी विजया मता।
तदा तु भवति भानोर्यागः सर्व्वगुणावहः॥
शशिरिक्तानुसंयोगे अर्कर्क्षे सोत्तरासु च।
नवम्यां मङ्गलायोगो भानुमूलदिनं यदा॥
अष्टम्यां वाथ चन्द्राहे श्रवणेन शुभावहम्।
अहिर्ब्रध्ने कुजाहे तु गणेशे तस्य वाहनि॥
पुनर्व्वसौ गुरोर्व्वारे द्वादश्यां श्रवणेन वा।
सोमग्रस्तं यदा योगं विष्णोः सर्व्वार्थसाधकम्॥
द्वितीयायां यदा सौम्ये कृत्तिकर्क्षं भवेत् क्वचित्।
ग्रहयागस्तदा कार्य्यः सर्व्वशान्तिप्रदायकः॥
स्वातीसौमी चतुर्थी च उमायागे वरा स्मृता॥
उत्तरासु च सर्व्वासु भानुपौर्णाष्टमीषु च।
शान्त्यभिषिकयागेषु सर्व्वकामार्थदाष्टमी॥
गुरावेकादशी पुष्ये रोहिण्या वा यदा शनिः।
सुतसौभाग्यकामाय यागो रुद्रविनायके॥
पूर्णिमासु च सर्व्वासु अष्टमीद्वादशीषु च।
चतुर्द्दश्यां तृतीयासु ग्रह ऋक्षे शुभेषु च।
सर्व्वेषां भवति यागो भक्तिपूर्व्वो महामुने!॥
मन्त्रसाधनद्रव्यायो रुद्रयागादवाप्यते।
श्रीमेधाज्ञानवात्सल्यसुमायामाम्महामुने॥
योगज्ञानयशःसिद्धिं महादेवादवाप्नुयात्।
आरोग्यं सप्रतापत्वं भास्करात् प्राप्यते ध्रुवम्॥
गतिमिष्टां यथाकामं प्रयच्छति त्रिविक्रमः।
विघ्नो न भवते तस्य यस्तु पश्येद्विनायकम्॥
विगतारिर्भवेत् षष्ठ्यां दृष्ट्वा स्कन्दं मखे क्षणात्।
मातृयागान्महासिद्धिः सर्व्वेषामपि जायते॥
भवते धनवान् पुंसः प्रथमाहे हुताशनात्।
स्वर्गापवर्गसंसिद्धिर्दुर्गायागात् प्रजायते॥
माघाद्यैर्मङ्गलाशोत्था ज्यैष्ठाद्यैर्ब्रं च जायते।
ईशाद्यैः कालिकाद्यास्तु यष्टव्या विधिना मुने॥"
इत्याद्ये देव्यवतारे उदयतिथ्यृक्षयोगमाहात्म्यकीर्त्तनम्॥*॥

अथ ग्रहयागविधिः।
"प्रणम्य नव रव्यादीन् शुभाशुभफलप्रदान्।
ग्रहयागविधिं सम्यक् वक्ति श्रीरघुनन्दनः॥

अथ ग्रहयागप्रयोगः।
तत्र रविसोमबुधगुरुशुक्रवारेषु चित्रानुराधामृगशिरोरेवतीपुष्याश्विनीहस्तारोहिण्युत्तरात्रयेषु चन्द्रतारानुकूले शुभलग्ने यागः कार्य्यः। अत्र बालग्रहभूतग्रहप्रबलतरनराधिपशत्रुदुःसहरोगाभिभवाद्भूतदुःस्वप्नावलोकनग्रहदौःस्थ्यादिनिमित्तकं शान्तिकं मलमासादावपि कर्त्तव्यम्। अवग्रहं विना केवलदृष्टायुःपुष्टिपुत्त्रश्रीकामादिपौष्टिकन्तु मलमासादीतरकाल एव कार्य्यम्॥*॥ तत्र यजमानः कृतस्नानादिः गोमयोपलिप्ते देशे सदर्भासनोपविष्ट उदङ्मुखः स्वस्तिवाच्यः सूर्य्यः सोम इति पठित्वा फलपुष्पतिलदर्भत्रयसहितजलपूर्णताम्रपात्रं गृहीत्वा, ॐ तद्विष्णोरिति विष्णुं संस्मृत्य ॐ तत् सदित्युच्चार्य्य ॐ अद्येतादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा अमुककामो ग्रहयज्ञमहं करिष्ये इति सङ्कल्प्य तज्जलमैशान्यां निःक्षिपेत्। अन्यार्थत्वे गोत्रनाम्नोः षष्ठ्यन्तता। करिष्ये इत्यत्र करिष्यामीति विशेषः। ततः श्वेतसर्षपानादाय।
ॐ वेतालाश्च पिशाचाश्च राक्षसाश्च सरीसृपाः।
अपसर्पन्तु ते सर्व्वे ये चान्ये विघ्नकारकाः॥
ॐ विनायका विघ्नकरा महोग्रा
यज्ञद्विषो ये पिशिताशनाश्च।
सिद्धार्थकैर्वज्रसमानकल्पै-
र्मया निरस्ता विदिशः प्रयान्तु॥
इत्येताभ्यां मन्त्राभ्यां श्वेतसर्षपप्रक्षेपैर्व्विघ्नकारकानपसारयेत्। ततः गणाधिपषोड़शमातृकापूजा वसोर्धारा आयुष्यजपं तदन्ते गायत्रीजपं वृद्धिश्राद्धञ्च कृत्वा तदशक्तौ भोज्यसुतृप्तान् ब्राह्मणान् परितोष्य ततः स्वयमशक्तौ कर्त्ता प्राङ्मुखं गुरुम् ॐ साधु भवानास्तामिति वदेत् ॐ साध्वहमासे इति प्रतिवचनम्। ततो गन्धपुष्पवस्त्राङ्गुरीयकादिना गुरुमलङ्कृत्य दक्षिणं जानु स्पृष्ट्वा ॐ अद्येत्यादि मत्सङ्कल्पितग्रहयागकर्म्मणि ग्रहपूजाहोमकर्म्मकरणाय अमुकगोत्रं अमुकदेव-